दाहृतसम्भावनायैव सम्बन्धात् तद्विपर्य्ययः। "सममेव समाक्रान्तं द्वयं द्विरदगामिना तेन सिंहासनं पित्र्यमखिलञ्चारिमण्डल"मित्यत्र कार्य्यकारणयोः पौर्व्वापर्य्याभावः।

**अतिशायन** न॰ अति-शीङ् ल्युट् "अतिशायने इष्ठ"नित्यादिसूत्रनिर्द्देशात् नि॰ दीर्घः। आधिक्ये, प्रकर्षे च। "भूमनिन्दाप्रशंसायां नित्ययोगेऽतिशायने इति" कारिका।

**अतिशीत** न॰ अतिशयितं शीतम् प्रा॰स॰। अत्यन्तशीतलस्पर्शे। तद्विशिष्टे त्रि॰।

**अतिशेष** पु॰ अतिशिष्यते कर्म्मणि घञ्। स्वल्पावशिष्टे, "स हि खादित्वातिशेषान् जायाया आजहारेति"। [श्रेष्ठे च।

**अतिशोभन** त्रि॰ अति+शुभ—ल्यु। अत्यन्तशोभान्विते,

**अतिश्व** त्रि॰ अतिक्रान्तः श्वानं बलेन षच् समा॰। वराहादौ। सेवायां स्त्री, सेवायाः कुक्कुरवत् पराधीनवृत्तित्वात् तथात्वम्। अतएव मनुना "न श्ववृत्त्या कदाचनेति" सेवायाः कुक्कुरवृत्तित्वेन निषेधः कृतः।

**अतिश्वन्** पु॰ अतिशयितः सुन्दरः श्वा अतेः पूजार्थत्वात् न समा॰। उत्तमकक्कुरे तद्दूरदेशादौ पक्षा॰ फक्। आतिश्वायनः तद्दूरदेशादौ त्रि॰।

**अतिष्ठा** त्रि॰ अतीत्य सर्व्वान् तिष्ठति स्था-क्विप्-षत्वम्। सर्व्वातीते। "अतिष्ठा वा एषा छन्दसां यदतिच्छन्दा अतिष्ठा अश्वमेधो यज्ञानामिति" शृ॰उ॰।

**अतिसञ्चय** पु॰ अतीत्य आवश्यककृत्यं सञ्चयः। मधुमक्षिकादीनामिव स्वपरवञ्चनेनातिमात्रसञ्चये।

**अतिसन्ध** त्रि॰ अतिक्रान्तः सन्धां सन्धानं मर्य्यादां वा अत्या॰ स॰। सन्धानवर्ज्जिते, अतिक्रान्तमर्य्यादे च।

**अतिसन्धेय** त्रि॰ अतिकष्टेन सन्धेयः अनुसन्धेयः संयोज्योवा। कष्टानुसन्धेये, कष्टेन संयोजनीये च।

**अतिसन्ध्या** स्त्री अत्यासन्ना सन्ध्या यस्याः ब॰स॰। पूर्व्वदिवसीयरात्रिशेषदण्डादिपरदिनसूर्य्योदयपर्य्यन्तः, सूर्य्यास्तात् पूर्व्वोत्तरदण्डात्मकश्च कालः सन्ध्या। तस्याः आसन्ने काले। "नातिसन्ध्यासमीपत" इति स्मृतिः।

**अतिसर** त्रि॰ अतीत्य स्वगतिमुल्लङ्घ्य सरति अति+सृ—अच्। अतिचारिणि, अग्रसरे च याँ "असावतिसरांश्चकारेति

**अतिसर्ग** पु॰ अति+सृज-घञ्। दाने। "सृष्टवैरातिसर्गात्तु मया तस्य दुरात्मनः" इति रघुः। सर्गं सृष्टिमतिक्रान्तरि, नित्ये, मुक्ते च त्रि॰। अतिसृज्यते यथेष्टं कर्म्म क्रियतेऽनेन। कामचारानुज्ञायाम् यथेच्छं क्रियतामित्याद्यभिलापरूपायाम् "विधिनिमन्त्रणामन्त्रणाधीष्टप्रश्नातिसर्गेति" पा॰। अतिसर्गः कामचारानुज्ञेति वृत्तिः।

**अतिसर्जन** न॰ अति+सृज-ल्युट्। दाने, वधे, विप्रलम्भे, अतिशयदाने च। "ज्वलनातिसर्जनादिति" कुमा॰।

**अतिसर्व्व** त्रि॰ अतिक्रान्तः सर्वान् अत्या॰स॰ गौणत्वान्न सर्वनामता। सर्वातिगे सर्वातीते। "अतिसर्वाय सर्वायेति" मुग्ध॰।

**अतिसान्तपन** न॰ अतिक्रान्तं सान्तपनमधिकदिनसाध्यत्वात् अत्या॰ स॰। "गोमूत्रगोमयक्षीरदधिसर्पिःकुशोदकान्येकाहं द्वितीयमुपवसेत्तत् सान्तपनम्, त्र्यहाभ्यस्तैश्चातिसान्तपनमिति" विष्णूक्ते व्रतभेदे।

**अतिसाम्या** स्त्री अत्यन्तं साम्यं मधुनाऽस्याः। मधुयष्टिलतायाम्। प्रा॰स॰। अत्यन्तसादृश्ये न॰।

**अतिसायम्** अव्य॰ अत्यासन्नं सायम् यस्य ब॰स॰। सायंकालसमीपे काले "नातिप्रगे नातिसायमिति" स्मृतिः।

**अति(ती)सार** पु॰ अतिसारयति मलम् द्रवीकृत्य अति+सृ—णिच्-अच् वा अतेः दीर्घः। रोगभेदे उदरामये। तस्य निदानादि सुश्रुते उक्तं यथा "गुर्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः। विरुद्धाध्यशनाजीर्णैर्विषमैश्चापि भोजनैः। स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विषैर्भयैः। शोकाद्दुष्टाम्बुमद्यातिपानैः सात्म्यर्त्तुपर्य्ययैः। जलाभिरमणैर्वेगविघातैः कृमिदोषतः। नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते। (तस्य संप्राप्तिः) "संशम्यापां धातुरग्निं प्रवृद्धः शकृन्मिश्रो वायुनाधः प्रणुन्नः। सरत्यतीवातिसारं तमाहुर्व्याधिं घोरं षड्विधं तं वदन्ति। एकैकशः, ३ सर्वशश्चापि ४ दोषैः शोकेनान्यः ५ षष्ठ आमेन ६ चोक्तः॥ (तस्य पूर्व्वरूपम्) हृन्नाभिपायूदरकुक्षितोद—गात्रावसादानिलसन्निरोधाः। विट्सङ्ग आध्मानमथाऽविपाको भविष्यतस्तस्य पुरःसराणि। (वायुजः) शूलाविष्टः सक्तमूत्रोऽन्त्रकूजी स्रस्तापानः सन्नकट्यूरुजङ्घः। वर्चोमुञ्चत्यल्पमल्पं सफेनं रूक्षं श्यावं सानिलं मारुतेन। (पित्तजः) दुर्गन्ध्युष्णं वेगवन्मांसतोयप्रख्यं भिन्नं स्विन्नदेहोऽतितीक्ष्णम्। पित्तात्पीतं नीलमालोहितं वा तृष्णा मूर्च्छा दाहपाकज्वरार्त्तः। (कफजः) तन्द्रानिद्रागौरवोत्क्लेशसादी वेगाशङ्की सृष्टविट्कोऽपि भूयः। शुक्लं सान्द्रं श्लेष्मणा श्लेष्मयुक्तं भक्तद्वेषी निस्वनं हृष्टरोमा॥ (त्रिदोषजः) तन्द्रायुक्तो मोहसादास्यशोषी वर्चः कुर्य्यान्नैकवर्णं तृषार्त्तः। सर्व्वोद्भूतः सर्वलिङ्गोपपत्तिः कृच्छ्रश्चायं बालवृद्धेष्वसाध्यः॥ (शोकजः) तैस्तैर्भावैः शोचतोऽल्पाशनस्य बाष्पो वेगः पक्तिमाविध्य-